# Purushottamaproktam Putripraptyai Karaniyam Putrivratavarnanam

# પુરુષોત્તમપ્રોક્તં પુત્રીપ્રાપ્ત્યૈ કરણીયં પુત્રીવ્રતવર્ણનમ્

## Document Information

Text title : Purushottamaproktam Putripraptyai Karaniyam Putrivratavarnanam

File name : puruShottamaproktaMputrIprAptyaikaraNIyaMputrIvratavarNanam.itx

Category : misc, lakShmInArAyaNIyasaMhitA

Location : doc_z_misc_general

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 122/66-115||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# પુરુષોત્તમપ્રોક્તં પુત્રીપ્રાપ્ત્યૈ કરણીયં પુત્રીવ્રતવર્ણનમ્

શ્રીનારાયણીશ્રીરુવાચ ।
કીદૃશં તદ્વ્રતં પ્રોક્તં પુત્રીવ્રતં મખાત્મકમ્ ।
આદ્યન્તં સફલં સ્યાદ્યત્તત્તથા મે વિધિં વદ ॥ ૬૬॥

શ્રીપુરુષોત્તમ ઉવાચ ।
શૃણુ પુત્રીવ્રતં માતા કમ્ભરા યચ્ચકાર હ ।
મહાલક્ષ્મીર્લલિતાશ્રીઃ સપુત્રી સા તતોઽભવત્ ॥ ૬૭॥

ફાલ્ગુનસ્યાઽસિતે ચાઽઽદ્યે પક્ષે વૈ પઞ્ચમીતિથૌ ।
પુત્રીવ્રતં પ્રકર્તવ્યં માત્રા સૌભાગ્યસમ્પદા ॥ ૬૮॥

ચતુર્થ્યાસ્તુ નિશાયાં વૈ દુગ્ધપાનપરા ભવેત્ ।
બ્રહ્મચર્યપરા સ્યાચ્ચ ભવેદ્ભૂતલશાયિની ॥ ૬૯॥

દુષ્ટસ્વપ્નં યથા ન સ્યાત્તથા નિદ્રાં વિધાય વૈ ।
લલિતાશ્રીમહાલક્ષ્મીં સ્મૃત્વોત્થાય ક્ષણં ચ તામ્ ॥ ૭૦॥

ધ્યાત્વા ચતુર્ભુજાં લક્ષ્મીં સ્વર્ણચમ્પકરોચનામ્ ।
યુવતીં ચ હરિદ્વર્ણામ્બરાં સ્વર્ણવિભૂષિતામ્ ॥ ૭૧॥

આલિપ્તાં ચન્દનાદ્યૈશ્ચ ગન્ધસારસુગન્ધિતામ્ ।
પ્રસન્નવદનાં પદ્મગર્ભાભકરપત્તલામ્ ॥ ૭૨॥

રૂપાનુરૂપાવયવાં ચન્દ્રાભમુખશોભિતામ્ ।
તામ્બૂલચર્વણરક્તાધરશોભાવિરાજિતામ્ ॥ ૭૩॥

યૌવનપૂરસંશોભદ્વિગ્રહાં પુષ્ટરૂપિણીમ્ ।
ધ્યાત્વા સ્નાત્વા તતઃ સ્વર્ણમૂર્તૌ તાં પૂજયેત્ સતી ॥ ૭૪॥

સઙ્કલ્પયેન્મહાલક્ષ્મિ! પુત્ર્યર્થં પઞ્ચમીવ્રતમ્ ।
કરોમ્યદ્ય નિરાહારં નિર્વિઘ્નં પૂર્ણમસ્તુ મે ॥ ૭૫॥

તન્નિમિત્તં પૂજનં તે માતઃ કરોમિ શોભનમ્ ।
આગચ્છાઽત્રાઽઽસને તિષ્ઠ ગૃહ્ણ પાદ્યં શુભાર્ઘ્યકમ્ ॥ ૭૬॥

આચમનં તતઃ પઞ્ચામૃતસ્નાનં વિધેહિ ચ ।
અભિષેકં ગન્ધિજલૈર્ગન્ધિસારયુતૈઃ કુરુ ॥ ૭૭॥

વસ્ત્રાભરણભૂષાલઙ્કારશ‍ृઙ્ગારકં વહ ।
સૌભાગ્યદ્રવ્યસિન્દૂરાન્ પુષ્પહારાન્ પ્રયુઙ્ક્ષ્વ ચ ॥ ૭૮॥

ધૂપં દીપં ચ નૈવેદ્યં દુગ્ધસારં ચ પાયસમ્ ।
મિષ્ટાન્નાનિ વિચિત્રાણિ ભુઙ્ક્ષ્વ શાકફલાનિ ચ ॥ ૭૯॥

જલપાનં તતસ્તામ્બૂલકં સ્વીકુરુ ચોત્તમમ્ ।
આરાર્ત્રિકં પુષ્પમાલાં પ્રાર્થનાં સ્વીકુરુ ધ્રુવામ્ ॥ ૮૦॥

પ્રદક્ષિણાં નમસ્કારાન્ દણ્ડવત્ સ્વીકુરુ ત્વથ ।
દેહિ પુત્રીં ત્વત્સરૂપાં સર્વસૌભાગ્યશાલિનીમ્ ॥ ૮૧॥

સર્વાઙ્ગશોભનાં રમ્યાં પદ્મિનીં મન્થરાગતિમ્ ।
સેવિકાં તોષહેતું ચ દિવ્યર્દ્ધિં શાન્તિચન્દ્રિકામ્ ॥ ૮૨॥

દીર્ઘજીવાં ચ નીરોગાં સમ્પદામીશ્વરીં સતીમ્ ।
વંશશોભાં પતિપુત્રભાગ્યવતીં ચ સદ્ગુણામ્ ॥ ૮૩॥

પરમેશ્વરભક્તાં તે ભક્તાં દેહિ સુપુત્રિકામ્ ।
ઇત્યભ્યર્ચ્ય તતો ભક્તિં કુર્યાત્ કીર્તનરૂપિણીમ્ ॥ ૮૪॥

જપમાલાં યથાશક્ત્યાવર્તયેદ્ભક્તિમાનસા ।
મધ્યાહ્નેઽપિ સુનૈવેદ્યં જલં તામ્બૂલકં દિશેત્ ॥ ૮૫॥

પ્રસ્વાપયેત્તતશ્ચોત્થાપયેત્ ફલં સમર્પયેત્ ।
જલં સમર્પયેદ્રાત્રાવારાર્ત્રિકં સુપૂજનમ્ ॥ ૮૬॥

કુઙ્કુમાઽબીરકસ્તૂરીકર્પૂરકુસુમાદિભિઃ ।
પાયસાદ્યૈર્ભોજનં ચ કારયિત્વાઽથ નર્તનમ્ ॥ ૮૭॥

કીર્તનં ગાયનં ચાપિ ચરેજ્જાગરણં નિશિ ।
વ્રતકર્ત્રી તતઃ પ્રાતઃ સ્નાત્વા સંસ્નાપ્ય માતરમ્ ॥ ૮૮॥

મહાલક્ષ્મીં પૂજયિત્વા સમ્ભોજ્યાઽઽરાર્ત્રિકોત્તરમ્ ।
દેહિ પુત્રીં વ્રતં પૂર્ણં કૃતં ક્ષમાં કુરુ વ્રતે ॥ ૮૯॥

અપૂર્ણં પૂર્ણતાં યાતુ ત્વત્પ્રતાપાત્ પરેશ્વરિ ।
ઇત્યભ્યર્થ્ય નમસ્કૃત્વા વિસર્જયેત્તતઃ પરમ્ ॥ ૯૦॥

પતિં સ્વં ભોજયિત્વા તત્પાદાઙ્ગુષ્ઠજલામૃતમ્ ।
લક્ષ્મીપ્રસાદસહિતં પીત્વા ભોજનમાચરેત્ ॥ ૯૧॥

દદ્યાદ્દાનાનિ વિધિના યથાશક્તિ યથાધનમ્ ।
કન્યાયોગ્યામ્બરભૂષાશૃઙ્ગારાદિ સમસ્તકમ્ ॥ ૯૨॥

કન્યકાં ભોજયેદષ્ટાઽવરાં દદ્યાત્સુદક્ષિણામ્ ।
એવં કુર્યાદ્વ્રતં લક્ષ્મિ પુત્રીપ્રાપ્તિપ્રદાયકમ્ ॥ ૯૩॥

કૃષ્ણે યથા તથા શુક્લે ચતુર્વિંશતિપઞ્ચમીઃ ।
કુર્યાન્નિરુક્તરૂપેણ વ્રતિની પુત્રીદાયિનીઃ ॥ ૯૪॥

સ્વપ્ને ત્વાગત્ય સા બ્રૂયાન્મહાલક્ષ્મીઃ સુકન્યકા ।
પુત્રી તે ભાવિની સાધ્વિ વર્ષવ્રતોત્તરં તતઃ ॥ ૯૫॥

ઉદ્યાપનં પ્રકુર્યાચ્ચ શય્યાદાનસમન્વિતમ્ ।
મહાલક્ષ્મીપ્રપૂજાં ચ કારયેત્ સર્વભદ્રકે ॥ ૯૬॥

મહોત્સવં કારયેચ્ચ ધેનું દદ્યાત્ સવત્સિકામ્ ।
કન્યાદાનં દાપયેચ્ચ યથાશક્તિ યથાધનમ્ ॥ ૯૭॥

નમો લક્ષ્મ્યૈ નમો ધિષ્ણ્યૈ નમઃ પુત્ર્યૈ નમઃ શ્રિયૈ ।
રમાયૈ લલિતાયૈ ચ મહાલક્ષ્મ્યૈ નમોઽસ્તુ તે ॥ ૯૮॥

યથર્તુપુષ્પમાલાદ્યૈર્યથર્તુફલસદ્રસૈઃ ।
પ્રીયતાં મે મહાલક્ષ્મિ પુત્રીદાત્રી ચ મે ભવ ॥ ૯૯॥

એવમારાધયેદ્દેવીં કમ્ભરાશ્રીં સદા વ્રતે ।
વિત્તશાઠ્યં ન વૈ કુર્યાત્ કન્યા શઠા ન જાયતે ॥ ૧૦૦॥

ગર્ભિણી સૂતિકા વાપિ રોગિણી શુદ્ધિવર્જિતા ।
આપદ્ગતા સ્ત્રિયાઽન્યથા કારયેત્ પ્રયતા સ્વયમ્ ॥ ૧૦૧॥

અતિદુર્ભાગ્યયુક્તાયા વર્ષત્રયવ્રતૈર્ધ્રુવમ્ ।
પુત્રીપ્રાપ્તિર્ભવેદેવ લલિતાશ્રીકૃપાકણાત્ ॥ ૧૦૨॥

પુત્રીપ્રસવમાલોક્ય વ્રતં દેવ્યૈ સમર્પયેત્ ।

વ્રતં પુત્રીફલાન્તં વૈ કર્તવ્યં ચિરમેવ હિ ॥ ૧૦૩॥

આરમ્ભઃ ફાલ્ગુને કૃષ્ણે સમાપ્તિઃ પુત્રિકાઽર્જને ।
કમ્ભરાશ્રીમહાલક્ષ્મ્યા કૃતમાસીત્ ત્વિદં વ્રતમ્ ॥ ૧૦૪॥

સન્તોષાખ્યા વાસુદેવી લક્ષ્મીસ્તેન સુતાઽભવત્ ।
ઇત્યેતત્કથિતં લક્ષ્મિ વ્રતં પરમપાવનમ્ ॥ ૧૦૫॥

પુત્રીવ્રતં નરો નારી કૃત્વા પુત્રીમવાપ્નુયાત્ ।
સમુદ્રઃ કૃતવાનેતલ્લક્ષ્મીં પુત્રીમવાપ સઃ ॥ ૧૦૬॥

સદાશિવઃ કૃતવાઁશ્ચ જયાં પુત્રીમવાપ સઃ ।
બ્રહ્મા વ્રતં કૃતવાઁશ્ચ લલિતાં પ્રાપ વૈ સુતામ્ ॥ ૧૦૭॥

દિશો વ્રતં કૃતવત્યશ્ચાપુઃ પદ્માવતીં સુતામ્ ।
સૂર્યો વ્રતં કૃતવાઁશ્ચ પ્રભાં પુત્રીમવાપ હ ॥ ૧૦૮॥

કલ્પદ્રુમા વ્રતં કૃત્વા શ્રીં પુત્રીમાપુરેવ તે ।
દિવ્યા વિભૂતિરેવૈતત્ કૃત્વાઽઽપ માણિકીં સુતામ્ ॥ ૧૦૯॥

વૈરાજી ચ વ્રતં કૃત્વા કમલામાપ પુત્રિકામ્ ।
ખ્યાતિશ્ચૈતદ્વ્રતં કૃત્વા પ્રાપ શ્રીભાર્ગવીં સુતામ્ ॥ ૧૧૦॥

ધરણિસ્તદ્વ્રતં કૃત્વા પ્રાપ પદ્માવતીં સુતામ્ ।
એવમેતન્નાન્યથાઽસ્તિ સફલં તદ્વ્રતં ધ્રુવમ્ ॥ ૧૧૧॥

કન્યાર્થી નિજપત્નીં સઙ્ગચ્છેદ્વૈ પઞ્ચમેઽથવા ।
સપ્તમે નવમે ચૈકાદશે ત્રયોદશે ચ વા ॥ ૧૧૨॥

પઞ્ચદશે શુભે કાલે દિનસઙ્ખ્યાગતે નિશિ ।
બીજદાને કન્યકા સા જાયતે ગર્ભસમ્ભવા ॥ ૧૧૩॥

બીજદાને વાયુદેવો વામપાર્શ્વે ગતિપ્રદઃ ।
તદા કન્યા ભવેદેવ દક્ષપાર્શ્વે કુમારદઃ ॥ ૧૧૪॥

એવમેતન્ન સન્દેહસ્તતો જ્ઞાત્વા વ્રજેદૃતુમ્ ।
પઠનાચ્છ્રવણાદસ્ય વંશદં સત્ફલં ભવેત્ ॥ ૧૧૫॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૨૨-અધ્યાયાન્તર્ગતં પુરુષોત્તમપ્રોક્તં પુત્રીપ્રાપ્ત્યૈ
કરણીયં પુત્રીવ્રતવર્ણનં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૨૨/૬૬-૧૧૫ ॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 122/66-115..

Proofread by PSA Easwaran

---

*Purushottamaproktam Putripraptyai Karaniyam Putrivratavarnanam*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*